संहतानां समुच्चयः। ( यथा, श्रीकण्ठचरिते। ६। १८।

"नीरन्ध्रनिर्यत्सुमनोनिकाय-
काषायपङ्कप्रणयादशोकः॥")

निलयः। ( यथा, मनुः। १। ३६।

"एते मनूंस्तु सप्तान्यानसृजन् भूरितेजसः।
देवान् देवनिकायांश्च महर्षींश्चामितौजसः॥")

परमात्मा। इति मेदिनी। ये, ८७॥

निकाय्यः, पुं, ( निचीयतेऽस्मिन् धान्यादिकमिति। नि+चि+"पाय्यसान्नाय्यनिकाय्येति।" ३।१।१२९। इति ण्यत्प्रत्ययेन निपातनात् साधुः।) गृहम्। इत्यमरः। २। २। ५॥ ( यथा, भट्टिः। ६। ६६।

"न प्रणाय्यो जनः कश्चिन्निकाय्यं तेऽधितिष्ठति।
देवकार्य्यविघाताय धर्म्मद्रोही महोदये॥")

निकारः, पुं, ( नि+कृ+घञ्।) विप्रकारः। अपकारः। उत्कारः। धान्यस्योर्द्ध्वक्षेपणम्। इत्यमरभरतौ॥ खलीकारः। इति स्वामी॥ धिक्कारः। इति शब्दमाला॥

निकारणं, क्ली, ( निकारयति क्षिप्यत्यनेनेति। नि+कृ+णिच्+ल्युट्।) मारणम्। वधः। इत्यमरः। २। ८। ११२॥

निकाशः, त्रि, ( निकाशते शोभतेऽनेन इति। काश दीप्तौ+करणे ल्युट्।) नीकाशः। इत्यमरटीका॥ ( तालव्यशकारान्तोऽपि दृश्यते॥ )

निकुञ्चकः, पुं, ( निकुञ्चतीति। नि+कुञ्च कौटिल्ये+ण्वुल्।) परिमाणविशेषः। कुडवपादः। स च प्रसृत इति ख्यातः। इति भरतधृतवर्द्धक्षम्॥ वानीरवृक्षः। इति भावप्रकाशः॥ ( जलवेतसः। तत्पर्य्यायो यथा,—

"निकुञ्चकः परिव्याधो नादेयो जलवेतसः॥"

इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥ )

निकुञ्चितं, क्ली, ( नि+कुञ्च+क्तः।) अङ्गहारान्तर्गतशिरोविशेषः। यथा,—

"आकम्पितं कम्पितञ्च धुतं विधुतमेव च।
परिवाहितमाधूतमवधूतं तथाञ्चितम्॥
आकुञ्चितं परावृत्तमुत्क्षिप्तञ्चाप्यधोगतम्।
लोलितं प्रततञ्चेति चतुर्द्दशविधं शिरः॥"

इति सङ्गीतदामोदरः॥

निकुञ्जं, पुं क्ली, (नितरां कौ पृथिव्यां जायते इति। जन्+डः। पृषोदरादित्वात् समागमे साधुः।) कुञ्जम्। इत्यमरः। २। ३। ८॥ ( यथा, आर्य्यासप्तशत्याम्। ४६३।

"रचिते निकुञ्जपत्रैर्भिक्षुकपात्रे ददाति सा च-
न्नम्।
पर्य्युषितमपि सुतीक्ष्णमपकदुग्धं वधूरसनम्॥")

निकुञ्जिकाम्ला, स्त्री, ( निकुञ्जिका कुञ्जोद्भवा अम्ला।) कुञ्जिकाद्यचप्रभेदः। तत्पर्य्यायः। कुञ्जिका २ कुञ्जवल्लरी ३ इयं गुणैः श्रीवल्लीसदृशी। इति राजनिर्घण्टः॥

निकुम्भः, पुं, कुम्भकर्णपुत्त्रः। ( यथा, रामायणे। ६। ७५। ४६।

"स कुम्भश्च निकुम्भश्च कुम्भकर्णात्मजावुभौ।
प्रेषयामास संक्रुद्धो राक्षसैर्बहुभिः सह॥")

दन्तिकावृक्षः। इति मेदिनी। भे, १७॥ ( अस्य पर्य्यायो यथा,—

"विशाद्दन्ती निकुम्भः स्यादुपचित्रा मुकूलकः।
दाचायणी विशल्या च तथोडुम्बरपर्ण्यपि॥"

इति वैद्यकरत्नमालायाम्॥ )

( प्रह्रादस्य पुत्त्रविशेषः। यथा, महाभारते। १। ६५। १९।

"प्रह्रादस्य त्रयः पुत्त्राः ख्याताः सर्व्वत्र भारत!।
विरोचनश्च कुम्भश्च निकुम्भश्चेति भारत!॥"

दनोः पुत्त्राणामन्यतमः। यथा, तत्रैव। १। ६५। २५।

"निचन्द्रश्च निकुम्भश्च कुपटः कपटस्तथा।
शरभः शलभश्चैव सूर्य्याचन्द्रमसौ तथा।
एते ख्याता दनोर्व्वंशे दानवाः परिकीर्त्तिताः॥"

स्वनामख्यातः क्षत्रियविशेषः। इति सह्याद्रिखण्डे। ३४। ४४॥ महादेवस्य पार्श्वानुचरविशेषः। यथा, हरिवंशे। २९। ७५।

"पार्श्वे तिष्ठन्तमाहूय निकुम्भमिदमब्रवीत्।
गणेश्वरपुरीं गत्वा शून्यां वाराणसीं कुरु॥"

तथा च रघुः। २। ३५।

"अवेहि मां किङ्करमष्टमूर्त्तेः
कुम्भोदरं नाम निकुम्भमित्रम्॥"

स्कन्दस्य सैनिकविशेषः। यथा, महाभारते। ९। ४५। ५३।

"शृणु नामानि चाप्येषां येऽन्ये स्कन्दस्य
सैनिकाः।
विविधायुधसम्पन्नाश्चित्राभरणवर्म्मिणः।
शङ्कुकर्णो निकुम्भश्च पद्मः कुमुद एव च॥"

सूर्य्यवंशीयनृपविशेषः। यथा, हरिवंशे। १२। २।

"धौन्धुमारिर्दृढाश्वस्तु हर्य्यश्वस्तस्य चात्मजः।
हर्य्यश्वस्य निकुम्भोऽभूत् क्षत्रधर्म्मरतः सदा॥")

निकुम्भाख्यबीजं, क्ली, ( निकुम्भाख्यस्य दन्तिकावृक्षस्य बीजवत् बीजं यस्य।) जयपालः। इति राजनिर्घण्टः॥ ( जयपालशब्देऽस्य गुणादिकं ज्ञेयम्॥ )

निकुम्भितं, क्ली, नृत्यविषयकाष्टोत्तरशतकरणान्तर्गतकरणविशेषः। यथा, सङ्गीतदामोदरे।

"करणानान्तु सर्व्वेषां सामान्यं लक्षणन्त्विदम्।
प्रायो वामकरो वक्षःस्थितोऽन्यः पुरतोऽङ्गगः॥
पादाभ्यां करणं ज्ञेयं तदिष्टाष्टोत्तरं शतम्।
निकुम्भितं पार्श्वक्रान्तमतिक्रान्तं विवर्त्तकम्॥
विद्युद्भ्रान्तं गजक्रीडं क्रान्तञ्च गरुडप्लुतम्॥"

निकुम्भी, स्त्री, ( निकुम्भ+गौरादित्वात् ङीष्।) दन्तीवृक्षः। इति राजनिर्घण्टः॥

निकुरम्बं, क्ली, ( निकुरतीति। नि+कुर+बाहुलकात् अम्बच्।) समूहः। इत्यमरः। २। ५। ४०॥ ( पुंलिङ्गेऽपि दृश्यते। यथा, श्रीकण्ठचरिते। १८। ४०।

"आरक्तगण्डरुचिविद्रुमदण्डभाजो
यस्याश्रि पीननिकुरम्ब इवाट्टहासः॥")

निकृतः, त्रि, ( नि+कृ+क्तः।) प्रत्याख्यातः। शठः। इत्यमरः। ३। १। ४६॥ वञ्चितः। नीचः। इति मेदिनी। ते, ११६॥

निकृतिः, स्त्री, ( नि+कृ+क्तिन्।) भर्त्सनम्। क्षेपः। शठः। शाठ्यम्। इति मेदिनी। ते, ११६॥ ( यथा, किराते। १। ४५।

"न समयपरिरक्षणं क्षमन्ते
निकृतिपरेषु परेषु भूरिधाम्नः॥")

दैन्यम्। इति शब्दरत्नावली॥

निकृष्टः, त्रि, ( नि+कृष+क्तः।) अधमः। इत्यमरः। ३। १। ५४॥ जात्याचारादिनिन्दितः। इति भरतः॥

निकेतः, पुं, ( निकेतति निवसत्यस्मिन्निति। नि+कित निवासे+अधिकरणे घञ्।) निकेतनम्। इत्यमरटीकायां भरतः॥ ( यथा, देवीभागवते। ४। ११। १२।

"तदद्य विनयं कृत्वा सामपूर्व्वं छलेन वै।
तिष्ठध्वं स्वनिकेतेषु महागमनकाङ्क्षया॥")

निकेतनं, क्ली, ( निकेतति निवसत्यस्मिन्निति। नि+कित+अधिकरणे ल्युट्।) गृहम्। इत्यमरः। २। २। ४॥ ( यथा, देवीभागवते। १। २०। ४२।

"विसर्ज्जिताथ सा तेन गता शाश्वनिकेतनम्।
उवाच तं वरारोहा राजानं मनसेप्सितम्॥")

पलाण्डौ, पुं। इति शब्दचन्द्रिका॥

निकोचकः, पुं, (निकोचति शब्दायते। नि+कुच शब्दे+वुन्।) अङ्कोटवृक्षः। इत्यमरः। २। ४। २६॥ ( यथा, सुश्रुते। १। ४६।

"वातामाक्षोडाभिषुकनिचुलपिचुनिकोचकोरुमाणप्रभृतीनि॥"क्वचित् क्लीवलिङ्गेऽपि दृश्यते। यथा,—

"वातामाक्षोडाभिषुकं मुकूलकनिकोचकम्।
उरुमाणं प्रियालञ्च बृंहणं गुरुशीतलम्॥"

इति वाभटे सूत्रस्थाने षष्ठेऽध्याये॥)

निकोठकः, पुं, ( निकोचकः+पृषोदरादित्वात् चस्य ठः।) निकोचकः। इत्यमरटीकायां भरतः॥ ( यथा,—

"तिलः पियालाभिषुकौ विभीतका-
श्चित्राभयैरण्डमधूकसर्षपाः।
कुसुम्भविल्वारुकमूलकातसी-
निकोठकाक्षोडकरञ्जशिग्रुजाः॥
स्नेहाशयाः स्थावरसंज्ञितास्तथा-
स्युर्ज्जङ्गमा मत्स्यमृगाः सपक्षिणः॥"

इति चरके सूत्रस्थाने त्रयोदशेऽध्याये॥)

निक्वणः, पुं, (नि+क्वण शब्दे+"क्वणो वीणायाञ्च।" ३। ३। ६५। इति अप्।) वीणाया अन्यस्य च किन्नरादेः शब्दः। तत्पर्य्यायः। निक्वाणः २ क्वाणः ३ क्वणः ४ क्वणनम् ५। इत्यमरः। १। ७। २४॥ प्रादेरप्युपसर्गादुत्तरस्य क्वणधातोः प्रक्वाणः ६ प्रक्वणः ७ इत्यादयः प्रयोगा भवन्ति। आदिना सुक्वाणः सुक्वणः उपक्वाणः उपक्वणः इत्यादयः। इति भरतः॥